# શ્રીસ્કન્દલક્ષ્મીદુર્ગા સુપ્રભાતસ્તુતિઃ

Shri Skanda Lakshmi Durga Suprabhata Stuti

sanskritdocuments.org

July 1, 2019

# Shri Skanda Lakshmi Durga Suprabhata Stuti

# શ્રીસ્કન્દલક્ષ્મીદુર્ગા સુપ્રભાતસ્તુતિઃ

## Sanskrit Document Information

Text title : skandalakShmIdurgAsuprabhAtastutiH

File name : skandalakShmIdurgAsuprabhAtastutiH.itx

Category : subrahmanya, suprabhAta, devii, durgA, lakShmI

Location : doc_subrahmanya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan, PSA Easwaran psaeaswaran at gmail.com

Latest update : June 30, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 1, 2019

*sanskritdocuments.org*

# શ્રીસ્કન્દલક્ષ્મીદુર્ગા સુપ્રભાતસ્તુતિઃ

શ્રીસ્કન્દગુરુ ભુજઙ્ગસ્તોત્રં ચ  shrIskandaguru bhuja NgastotraM

શ્રીમત્સ્કન્દનગાવાસ શ્રીવિધાયક ષણ્મુખ ।
ઉત્તિષ્ઠ કરુણામૂર્તે શાન્તાનન્દવિધાયક ॥ ૧॥

શ્રીમત્સ્કન્દનગાવાસે સર્વસત્ત્વમયીશ્વરિ ।
ઉત્તિષ્ઠાષ્ટાદશભુજે લક્ષ્મીદુર્ગે નમોઽસ્તુ તે ॥ ૨॥

જ્યોતિષા મહતા સર્વલોકાજ્ઞાનવિનાશક ।
ઉત્તિષ્ઠ સ્કન્દ લોકેશ પ્રણવાર્થોપદેશક ॥ ૩॥

સર્વલોકૈકમાતસ્ત્વં શુમ્ભાસુરનિબર્હિણિ ।
ઉત્તિષ્ઠ લોકક્ષેમાય લક્ષ્મીદુર્ગે મહાદ્યુતે ॥ ૪॥

તારં ધ્વજાગ્રલસિતો વરતામ્રચૂડઃ
    ઊર્ધ્વં વિધાય નિજમસ્તકમાત્તમોદઃ ।
ત્વન્નામ કીર્તનમયં કુરુતે પવિત્રં
    સ્કન્દાચલેશ ગિરિજાસુત સુપ્રભાતમ્ ॥ ૫॥

કલ્યાણકારિણિ કરામ્બુજશોભિ પાશે
    કારુણ્યપૂર્ણહૃદયે કમનીયકાન્તે ।
કામાદિ વૈરિહરણે કુશલેઽસ્તુ લક્ષ્મી-
    દુર્ગેઽતિદીનજનપાલિનિ સુપ્રભાતમ્ ॥ ૬॥

શ્રીકન્નિમારભિધ સુન્દર પૂતકુલ્યા-
    તીરસ્થ શાખિનિલયા વિવિધા વિહઙ્ગાઃ ।
કૂજન્તિ કર્ણમધુરં વિવિધૈઃ સ્વરૈસ્તત્
    સ્કન્દાચલેશ ગિરિજાસુત સુપ્રભાતમ્ ॥ ૭॥

વામાગ્રભાગવિલસન્મહિષોત્તમાઙ્ગે
    દેવ્યગ્રભાગપરિશોભિત ધર્મસિંહે ।

કારુણ્યવર્ષિકમનીયમુખેઽદ્ય લક્ષ્મી-
    દુર્ગે નમોઽસ્તુ નતપાલિનિ સુપ્રભાતમ્ ॥ ૮॥

એતે ત્રિશુદ્ધિક્ષુ સહિતા મહિતા દ્વિજેન્દ્રાઃ
    વેદાગમાદિક્ષુ નિપુણા વિદિતાખિલાર્થાઃ ।
ભક્ત્યોચ્ચરન્તિ મધુરં નિગમસ્ય મન્ત્રં
    શ્રીદણ્ડશોભિકર સુન્દર સુપ્રભાતમ્ ॥ ૯॥

માંસં સુરામપિ બલિં પરિવર્જયેતિ
    યા વ્યાહરત્ સકલજીવદયાપરીતા ।
સા ત્વં સમસ્તજગતાં કુરુષેઽતિ ભદ્રં
    દુર્ગેઽમ્બિકેઽસ્તુ ભુવનેશ્વરિ સુપ્રભાતમ્ ॥ ૧૦॥

અગ્રે તવાદ્ય મધુરસ્વરકૃષ્ટચિત્તાઃ
    તાલાભિરઞ્જિતકરા વરગાયકાશ્ચ ।
ગાયન્તિ તે ગુણગણાનિતરાનવાપ્યાન્
    મધ્યાર્પિતૈકકર સુન્દર સુપ્રભાતમ્ ॥ ૧૧॥

માતસ્ત્વદીય પદપઙ્કજભક્તિભાજાં
    કુર્વન્તિ વજ્રધરવાયુમુખાસ્સુસેવામ્ ।
વક્તું પ્રભાવમખિલં તવ કોનુ શક્તઃ
    દુર્ગે નમોઽસ્તુ તવ સંપ્રતિ સુપ્રભાતમ્ ॥ ૧૨॥

તિષ્ઠત્યસૌ ચ જનતાશ્રુપરીતનેત્રાઃ
    ધૃત્વા સુગન્ધયુતબન્ધુરપુષ્પમાલાઃ ।
જ્યોતિર્નિરીક્ષિતુમુદારપદારવિન્દ
    સ્કન્દાચલેશ કરુણાકર સુપ્રભાતમ્ ॥ ૧૩॥

પુત્રં પુરા કિલ વિયુક્તમતિપ્રકોપાત્
    સ્કન્દં નિરીક્ષિતુમતીવ સમુત્સુકા ત્વમ્ ।
સ્કન્દાદ્રિમાગતવતી સહસૈવ લક્ષ્મી-
    દુર્ગે નમોઽસ્તુ નતપાલિનિ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીસ્કન્દાચલશોભિનં સુરનતાં રમ્યાનનં સુન્દરીં
    ભક્તાનામભયપ્રદં કલિમલધ્વંસૈકબદ્ધાદરામ્ ।
કારુણ્યામ્બુનિધિં સુશક્તિસહિતાં સર્વાર્થદાનક્ષમં
    દુર્ગાલક્ષ્મ્યભિધાં નમેમ જનનીં શ્રીદણ્ડપાણિઞ્ચ તમ્ ॥ ૧૫॥

આરક્તસુન્દરનખેન્દુરુચાનુલિપ્તૌ
    મઞ્જીરમઞ્જુલનિનાદમનોભિરામૌ ।
યોગીન્દ્રમૂર્ધવિનતૌ સકલેષ્ટદૌ તે
    સ્કન્દાચલેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૬॥

સૂર્યસ્ત્વદાપ્તવરદીધિતિરમ્બ સર્વાન્
    લોકાન્ પ્રબોધયિતુમેષ ઉદેતિ રમ્યઃ ।
ત્વઞ્ચાપિ પશ્ય કરુણાન્વિતલોચનાભ્યાં
    દુર્ગે તવાદ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૭॥

યસ્સકૃટં ગુરુમવાપ્ય સકૃદ્ગુહેતિ
    ભક્ત્યા વદત્યનુપમં તવ નામ તં હિ ।
યૌ રક્ષતસ્સપદિતાવરવિન્દતુલ્યૌ
    સ્કન્દાચલેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૮॥

શુમ્ભં નિશુમ્ભમપિ લોકહિતૈષિણિ ત્વં
    હત્વા શુભં વ્યરચયઃ કરુણામ્બુરાશે ।
માતસ્ત્વદીયકરુણા વચસામતીતા
    સ્કન્દાદ્રિગેઽદ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૯॥

સૃષ્ટિસ્થિતિપ્રલયકારક દીનબન્ધો
    ક્રૌઞ્ચાદ્રિભેદક વિરિઞ્ચિમુખામરેડ્ય ।
ભક્તેષ્ટદાયક દશદ્વિભુજાક્ષિશોભિન્
    સ્કન્દાચલેશ ચરણૌ શરણં પ્રપદ્યે ॥ ૨૦॥

મોહં વ્યપોહય મતિં કુરુ પાવનાં મે
    સન્માર્ગસઞ્ચરણલોલુપતાં પ્રયચ્છ ।
ચિત્તં કુરુષ્વ પદપઙ્કજયુગ્મલગ્નં
    માતસ્ત્વાદ્યચરણૌ શરણં પ્રપદ્યે ॥ ૨૧॥

ભક્તૈકવશ્ય પરિચિન્ત્ય બિભેમિ નાહં
    ભોગ્યા ભવેદ્યમપુરેઽધિકયાતનેતિ ।
ભક્ત્યા મુહુર્મુહુરિમૌ ભયહારિણૌ તે
    સ્કન્દાચલેશ ચરણૌ શરણં પ્રપદ્યે ॥ ૨૨॥

વાચાલમમ્બ કુરુષે સદયેઽતિમૂકં

દીનં કરોષિ સહસૈવ ધનાધિનાથમ્ ।
અજ્ઞાનિનં પ્રતિભયા સહિતં કરોષિ
માતુસ્તવાદ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૨૩॥

સ્કન્દેતિ કુક્કુટયુતેતિ ગુહેતિ યસ્ત્વાં
વાચાહ્વયત્યધિકભક્તિયુતા સકૃદ્વા ।
તસ્મૈ પ્રયચ્છસિ સમીહિતમર્થમાશુ
સ્કન્દાચલેશ ચરણૌ શરણં પ્રપદ્યે ॥ ૨૪॥

શાન્તાન્તરઙ્ગયતિવન્દિતપાદપદ્મે
ત્વામર્ચયન્તિ વનિતા યદિ ભક્તિપૂર્ણાઃ ।
સૌભાગ્યમાપ્ય સકલઞ્ચ મુદં લભન્તે
દુર્ગેઽમ્બિકેઽદ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૨૫॥

સુરસૈન્યપતેઽસુરસૈન્યરિપો
કરશોભિતદણ્ડમહાણ્ડકર ।
ખરતારકમારક તારક મે
મરણાદિ ભયં હર વીરવર ॥ ૨૬॥

જગતાં જનનીં રજનીશમુખીં
નમનીયપદાં કમનીયરુચિમ્ ।
મહિષાસુરમર્દનલોલપદાં
ભજતાં ભજતાં ભવભીતિહરામ્ ॥ ૨૭॥

અનઘં જગતાં જનકં ધનદં
વરદં શરદિન્દુસમાનમુખમ્ ।
વરનીરજલોચનમાર્તિહરં
કરદણ્ડધરં પ્રણમામિ ગુહમ્ ॥ ૨૮॥

અરુણાં કરુણાલસદક્ષિયુગાં
ગુરુનાથસુતાં તરુણાર્કવિભામ્ ।
સુરરાજનુતાં દરહાસયુતાં
નમતાં નમતાં સકલાર્થકરીમ્ ॥ ૨૯॥

ગિરિવાસરતં ગિરિજાત્મભવં
હરિજારમણં હરિણાઙ્કમુખમ્ ।
કરિવક્ત્રસહોદરમાદરતો

દુરિતક્ષતયે ધુરિ ભાતુ મહઃ ॥ ૩૦॥

પુરતઃ સ્ફુરદાત્મજ રમ્યમુખા-
મ્બુજલોચન લોલનિજાક્ષિયુગામ્ ।
સુલભાં સુખદાં વરદાં કરદાં
ભજ લક્ષ્મ્યભિધાં જનનીં જગતામ્ ॥ ૩૧॥

શરચ્ચન્દ્રતુલ્યં મુખં શારદામ્ભો-
રુહસ્પર્ધિપાદદ્વયઞ્ચાક્ષિયુગ્મમ્ ।
દૃષિત્કાલદણ્ડોજ્જ્વલં પાણિપદ્મં
સદા માનસે ભાતુ મે તારકારે ॥ ૩૨॥

કૃપાસ્રાવ્યપાઙ્ગાદૃતાનન્તભક્તા
દશાષ્ટાભિરાશોભિતા બાહુભિર્યા ।
વરસ્કન્દગિર્યાશ્રયા સા મહાભા
સદા ભાતુ દેવી મદીયાન્તરઙ્ગે ॥ ૩૩॥

ન રૂપં મનો મોહકં નાપિ વાણી
મનો હારિણી સ્કન્દશૈલાધિવાસ ।
ન વિદ્વત્વમપ્યસ્તિ ગાઙ્ગેય ભક્તિં
મદીયામવેક્ષ્ય પ્રસીદ પ્રસીદ ॥ ૩૪॥

સદાચારલોલં મનસ્સત્યવાચં
સદાન્યોપકારે રતત્વં મહત્વમ્ ।
પુનર્જન્મહીનત્વમાપ્તું પ્રમોદં
મહાલક્ષ્મ્યભીષ્ટપ્રદાઙ્ઘ્રી ભજેઽહમ્ ॥ ૩૫॥

ત્વયા તુલ્ય એકો ન ચાસ્તે ન ચાસ્તે
ક્ષમૌદાર્યશીલો મહેશસ્ય સૂનો ।
નરો મત્સમો નાસ્તિ પાપૈકલોભી
ક્ષમસ્વ ક્ષમસ્વ પ્રભો મેઽપરાધાન્ ॥ ૩૬॥

ત્વમેવામ્બ માતા મદીયા ભવાન્યાં
પુનર્માતરં મા કુરુ સ્કન્દમાતઃ ।
ક્ષમસ્વાપરાધાન્ મહેન્દ્રાદિવન્દ્યે
પ્રસીદ પ્રસીદાનુકમ્પા ગુણાઢ્યે ॥ ૩૭॥

શાન્તાનન્દ મહાયોગિન્ હૃદયાનન્દદાયક ।
સ્કન્દાચલશિરશ્શોભિન્ કુરુ સર્વસ્ય મઙ્ગલમ્ ॥ ૩૮॥

સ્કન્દાદ્રિશિખરાવાસા કામિતાર્થપ્રદાયિની ।
લક્ષ્મીદુર્ગાસ્વરૂપા સા કરોતુ મમ મઙ્ગલમ્ ॥ ૩૯॥

મયૂરપ્રિયવાહાય કુક્કુટધ્વજશોભિને ।
પાણિના ધૃતદણ્ડાય બાલસ્કન્દાય મઙ્ગલમ્ ॥ ૪૦॥

અષ્ટાદશભુજૈર્યુક્તા શિષ્ટાવનધુરન્ધરા ।
ઇષ્ટાનિષ્ટવિહીના સા કરોતુ ભુવિ મઙ્ગલમ્ ॥ ૪૧॥

અરુણામ્બુજપાદાય કરુણારસવાર્ધયે ।
તરુણાય સદા તુભ્યં ગુરુનાથાય મઙ્ગલમ્ ॥ ૪૨॥

વન્દ્યમાનજનાજ્ઞાનધ્વંસકારિપદામ્બુજે ।
લક્ષ્મીદુર્ગે કૃપાપાઙ્ગૈઃ કુરુ સર્વત્ર મઙ્ગલમ્ ॥ ૪૩॥

ઇતિ શ્રીસ્કન્દલક્ષ્મીદુર્ગા સુપ્રભાતસ્તુતિઃ
શ્રીસ્કન્દગુરુ ભુજઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Aruna Narayanan narayanan.aruna at gmail.com

Proofread by Aruna Narayanan, PSA Easwaran psaeaswaran at gmail.com

*Shri Skanda Lakshmi Durga Suprabhata Stuti*

pdf was typeset on July 1, 2019

Please send corrections to *sanskrit@cheerful.com*